Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 2 | ISSN : 2582-0095

# ब्रह्मपुराणम्

डॉ. नानूराम जाटः



रा. उ. प्रा. सं. विद्यालय माताजी भोपावास चौमूँ ,भारत।

**सारांशः**– श्लोकेन सिद्धयति यत् पुराणपठनं न केवलमामुष्मिकफलाय कल्पितम् अपितु संसारस्य ये कामा: श्रूयन्ते तेषाञ्च सिद्धि: अनेन कर्मणा भवति। सम्पूर्णं पुराणं ध्यानेन सावधानेनालोडितम्। तत्र यत् किञ्चित् प्राप्तं तत् सर्वं प्रवन्धे नियोजितम्। अस्मिनध्याये गोतत्त्वस्य विषये अनेकानि आख्यानानि सन्ति। निष्कर्ष: अस्ति यत् गो शब्दस्य अनेके अर्था: सन्ति।

**मुख्यशब्दः**– पुराणं, सिद्धिः, ब्रह्मपुराणे, गोतत्त्वम्, स्कन्दपराणे, ब्रह्मा-विष्ण, परिचयः।

ब्रह्मपुराणे गोतत्त्वम् – पुराणेषु ब्रह्मपुराणस्य उत्कृष्टं स्थानं भवति। ब्रह्मपुराणस्य परिचय: पूर्वस्मिन् पाठे विस्तरेण समालोचितः। अस्य संसारस्य संरक्षणं गोतत्वेन भवति

इति पौराणिकानामाशयः। स्कन्दपराणे ब्रह्मा-विष्ण शिवादिभि: कामधेनो: स्तुति: प्रसिद्धाः। तत्र प्रामुख्येन प्रोक्तम् -

त्वं माता सर्वदेवानां त्वं च यज्ञस्य कारणम्।
त्वं तीर्थं सर्वतीर्थानां नमस्ते स्तु सदानद्ये।।
शशिसूर्यारुणा यस्या ललाटे वृषभध्वजः।
सरस्वती च हुङ्कारे सर्वे नागाश्च कम्बले।।
क्षुरपृष्ठे च गन्धर्वा वेदाश्चत्वार एव च।
मुखाग्रे सर्वतीर्थानि स्थावराणि चराणि च।।[1]

अयमर्थ: हे अनहो पापरहिते त्वं सर्वेषां इन्द्रादिदेवानां मातासि तथा गंगादितीर्थानामपि तीर्थं त्वमसि। वयं त्वां सदा नमस्कुर्मः। तव ललाटप्रदेशे चन्द्र-सूर्य-अरुण वृषभध्वजशंकराश्च वसन्ति। तव हुंकारे भगवती सरस्वती गलकम्बले च नागगण: खुरेषु गन्धर्व: चत्वारो वेदा: तथा मुखाग्रे चराचराणि निखिलानि तीर्थानि वसन्ति।

पुराणस्यनादघोषं श्रुत्वा कस्यमनसि श्रद्धा न भवेत् अवश्यमेव भगवत्या: सुरभ्या: कामधेनो: महिमा प्रसादात् जगदिदं सुखमयं भवति। निश्चयेन यस्मिन् कस्मिन् च प्रदेशे गौर्भवति सदा पूज्या पालनीया च। गां दृष्ट्वा हृष्येत् प्रसीदेच्च। अग्निपुराणे स्पष्ट शब्देन कथितम् -

"गाव: पवित्रा मांगल्या गोषु लोका: प्रतिष्ठिता:"[2]

वैज्ञानिकानां परीक्षणेन इदं सिद्धं यत् गौ: सदा पवित्ररूपा भवति। तथा जीवनदायक वायुं (आक्सीजन इति। गन्नाति तथा त्यजत्यपि। सामान्य प्राणिनां एष व्यवहारो दृश्यते जीवनदायकं वायुं गृह्णाति दूषितं वायु (काबन डाइ ऑक्साइड) त्यजति। परन्तु ईश्वरस्य तावत् कश्चित् चमत्कारोत्र भवति ऑक्सीजनमेव त्यजति तस्मात् प्रकारान्तरेण प्रोक्तम् -

"गवां श्वासात् पवित्राभू: स्पर्शनात् किल्बिषक्षय:।"[3]

अवश्यमेव गवां दर्शनं पुण्यलाभाय पापक्षयाय च कल्प्यते।

पुराणेषु कथामाध्ययेन गवां च चर्चा बहुत्र प्राप्यते। गोशरीरस्योपमा नारीशरीरेण सह क्रियते। प्राचीनकाले कलहस्य प्रमुखं कारणं नारी आसीत् अथवा गाव: आसन्। तात्पर्यमत्र विद्यते नार्या: प्रतिष्ठा वैदिक कालादेव समाजे आसीत्।

यदि कोऽपि दुष्टः स्त्रीणां तिरस्कारं करोति स्म अवश्यमेवासौ दण्डनीयः आसीत्। यदि हठात् बलाच्च नार्याः अपहरणादिकं कृतं तर्हि अवशमेव युद्धं निश्चितम्। तथैव गौतस्करस्य कृते युद्धं भवति स्म। राज्ञः परमं कर्तव्यं आसीत् गवां संरक्षणं नारीणां च रक्षणं विधेयम्।

ब्रह्मपुराणमिदं अध्यायेषु विभक्तमस्ति। आदौ नैमिषारण्ये सूतस्यागमनं सूतमुखाच्च सृष्टेः प्रसंगः भवति। सर्वप्रथमं भागवतो हरेः स्तवनं कृतम् -

यस्मात् सर्वमिदं प्रपञ्चरहितं मायाजगज्जायते।
यस्मिंस्तिष्ठति याति चान्त समये कल्पानुकल्पे पुनः।।
यं ध्यात्वा मुनयः प्रपञ्चरहितं विन्दन्ति मोक्षं ध्रुवं।
तं वन्दे पुरुषोत्तमाख्यमखिलं नित्यं विभुं निश्चलम्।।
यं ध्यायन्ति बुधाः समाधिसमये शुद्धं वियत् संनिभं
नित्यानन्दमयं प्रसन्नममलं सर्वेश्वरं निर्गुणं।
व्यक्ताव्यक्तपरं प्रपञ्चरहितं ध्यानैकगम्यं विभुं
तं संसारविनाशहेतुमजरं वन्दे हरिं मुक्तिदम्।।[4]

पुराणेऽस्मिन् येषां वंशानामन्वयानां कीर्तनं श्रूयते ते सर्वेपि राजानः गोपूजकाः अभवन्। गोसेवायां सर्वेषां समर्पणं श्रूयते।

लोमहर्षणः कथायाः विस्तारपूर्वकं द्वीपानां वर्णनं चकार। तत्र सर्वेषु द्वीपेषु भारतवर्षस्य वैशिष्ट्यं सर्वैरेव स्वीकृतम्। यद्यपि सर्वे द्वीपाः सुखदाः सौख्यः प्रदाश्च सन्ति तथापि भारतस्य किञ्चित् वैशिष्ट्यं भणितं -

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।
यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः।।
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसंचयात्।।
गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे।
स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषा मनुष्याः।।
कर्माण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मरूपे।।[5]

एकोनपञ्चाशतमेऽध्याये इन्द्रद्युम्नकृत् स्तुतिः विष्णवे समर्पितम्। तत्र साक्षात् भगवान् विष्णुः समग्रस्य प्रपञ्चमात्रस्य पालको भवति। हे प्रभो त्वामह नमस्करोमि तद्यथा -

वासुदेव नमस्तेऽस्तु नमस्ते मोक्षकारण।
त्राहिमां सर्वलोकेश जन्मसंसार सागरात्।।
निर्मलाम्बर संकाश नमस्ते पुरुषोत्तम्।
संकर्षण नमस्तेस्तु त्राहिमां धरणीधर।।
नमस्ते हेमगर्भाय नमस्ते मकरध्वज।
रतिकान्तनमस्तेस्तु त्राहिमां शम्बरान्तक।।
नमस्तेऽञ्जनसंकाश नमस्ते भक्तवत्सल।
अनिरुद्ध नमस्तेऽस्तु त्राहि मां वरदो भव।।
नमस्ते विबुधावास नमस्ते विबुधप्रिय।
नारायण नमस्तेऽस्तु त्राहिमां शरणागतम्।।
नमस्ते बलिनां श्रेष्ठ नमस्ते लाङ्गलायुध।

चतुर्मुख जगद्धाम त्राहिमां प्रपितामह।।

नमस्ते नीलमेघाभ नमस्ते त्रिदशार्चित।

त्राहि विष्णो जगन्नाथ मग्नं मां भवसागरे।।[6]

अस्या स्ततो प्रायेण एकसप्ततिः श्लोकाः शरणागतभावेन पारणात लोकानां समीक्षणेनि सिध्यति भगवतः कृपा यावन्न भवति तावत् कत्याच तणमात्रस्य च प्रादुर्भाव. असम्भवः। अस्मिन् संसारे यानि यानि आयुधानि शस्त्रास्त्राणि शास्त्रेषु कथितानि तानि सर्वाणि ततोऽधिकानि च परमेश्वरस्य सान्निध्ये सन्ति। अयमीश्वरः सर्वत्र व्याप्य चित् स्वरूपेण जीवेषु वसति। द्वेताद्वेतस्य च भेद. मनुष्यैः प्रकल्पित: तद्यथा -

भेदास्ते कीर्तिता ये तु हरे संकर्षणादयः।

तव पूजार्थसम्भूतास्ततस्त्वयि समाश्रिताः।।

न भेदस्तव देवेश विद्यते परमार्थतः।

विविधं तव यद्रूपं उक्तं पदुपचारतः।।

अद्वैतं त्वां कथं द्वैतं वक्तुं शक्नोति मानवः।

एकस्त्वं हि हरेव्यापी चित्स्वभावो निरञ्जनः।।

परमं तव यद्रूपं भावाभावविवर्जितम्।

निर्लेपं निर्गुणं श्रेष्ठं कूटस्थमचलं ध्रुवम्।।

सर्वोपाधि विनिर्मुक्तं सत्तमात्रव्यवस्थितम्।

तद्देवाश्च न जानन्ति कथं जानाम्यहं प्रभो।।

अपरं तव यद्रूपं पीतवस्त्रं चतुर्भुजम्।

शंखचक्रगदापाणिमुकुटाङ्गदधारिणम्।।

श्रीवत्सोरस्क संयुक्तं वनमाला विभूषितम्।

तदर्चयन्ति विबुधा ये चान्ये तव संश्रया:।।

देव देव सुरश्रेष्ठ भक्तानामभयप्रद।

त्राहि मां पद्मपत्राक्ष मग्नं विषयसागरे।

नान्यं पश्यामि लोकेश यस्याहं शरणं व्रजे।

त्वामृते कमलाकान्त प्रसीदमधुसूदन।।[7]

भगवतो विष्णोरवतारस्य समग्रं चिन्तनं गां विना न सम्भवति। भगवत ऐश्वर्य समा: गाव: शृंगारभूताश्च भवन्ति। भगवान् कदाचित् गोपालकत्वेन स्तुत: कुत्रचित् च वत्सपालकत्वेन अपरत्र च हलायुधनाम्ना स्मारित:। हलायुधो भगवान् हलयन्त्रेण सर्वाणि दुःखानि व्यपोहति। किं बहुना हलं धृत्वाऽसौ शोभायमानो भवति। अस्य विश्लेषणं साम्प्रतिकानां विज्ञानमेव शरणागतानां प्राचीनविचारे विश्वासरहितानां कृते आवश्यकं भवति। कथं भगवान् हलायुधःइति। अस्य प्रश्नस्य समाधानं एकमेव वर्तते हलं काष्ठनिर्मितं भवति तथा अन्नानामुत्पत्तौ प्रमुखं साधनं बहुप्रयासो कृतेऽपि वैज्ञानिका: नवीनं अन्नं स्रष्टुं न समर्थाः सन्ति। हलयन्त्रं उद्योगस्य चिह्नं वर्तते। यत्र क्वापि अन्नस्याभावो जगति दृश्यते निश्चयं तत्र हलप्रवहणकत्रो न विद्यन्ते। हलप्रवहणेन गवां
संरक्षणं निश्चितम्। यथाम्याह -

नमस्ते हलधृग्राम नमस्ते मुसलायुध।

नमस्ते रेवतीकान्त नमस्ते भक्तवत्सल।।

नमस्ते बलिनां श्रेष्ठ नमस्ते धरणीधर।

प्रलम्बारे नमस्तेऽस्तु त्राहि मां कृष्णपूर्वज।।[8]

अशीतितमेऽध्याये स्त्रीणां धर्म: विशेषेण वर्णित: स्त्री गृहे अन्यत्र च पुरुषं रक्षति। तस्या: प्रभाव: सदा गृहे भवति। सा यत्नेन पुरुषं तोषयति। अस्मिन्नेव प्रकरणे अतिथीनाञ्च सत्कार: प्रयासेन कर्तव्यः। अतिथीनां कृते अन्नदानं कर्तव्यम्। उक्तञ्च -

पतिरेव गुरु: स्त्रीणां सर्वस्याभ्यागतो गुरुः।
अभ्यागतमनुप्राप्तं वचनैस्तोषयन्ति ये।।
तेषां वागीश्वरी देवी तृप्ता भवति निश्चितम्।
तस्यान्नस्य प्रदानेन शक्रस्तृप्तिमवाप्नुयात्।।
पितर: पादशौचेन अन्नाद्येन प्रजापतिः।
तस्योपचाराद्वै लक्ष्मीर्विष्णुना प्रीतिमाप्नुयात्।।
शयने सर्वदेवास्तु तस्मात् पूज्यतमोऽतिथिः।
अभ्यागतमनुश्रान्तं सूर्योढं गृहमागतम्।।
तं विद्यादेवरूपेण सर्वक्रतुफलोह्यसौ
अभ्यागतं श्रान्तमनुव्रजन्ति
देवाश्च सर्वे पितरोऽग्यश्च।
तस्मिन् हि तृप्ते मुदवाप्नुवन्ति
गते निराशेऽपि च ते निराशा:।। [9]

अत्रैव प्रसंगे एको विशिष्ट: श्लोक: उदाहृत: उपकारस्य अपकारस्य च सामान्यो जन: भेदपूर्वकं मीमांसां करोति किन्तु साधूनां दृष्टौ उपकारापकारौ द्वावपि वरौ भवतः। उपकारस्य प्रत्युपकार: सर्वत्र दरीदृश्यते परन्तु अपकारस्य प्रत्युपकारं कश्चित् साधुरेव करोति। तद्यथा

उपकारोऽपकारश्च प्रवराविति सम्मतौ।
उपकारिषु सर्वोऽपि करोत्युपकृतिं पुनः।।
अपकारिषु यः साधु: पुण्यभाक् स उदाहृतः।।[10]

पंचाशीतितमेऽध्याये क्षुधातीर्थस्य माहात्म्यं प्रकटितम्। क्षुधा एका देवी भूत्वा प्रकटिता। महर्षिकण्व: तां क्षुधां स्तौत-सर्वेषां पापिनां पापमयी दुःखमयी च त्वमसि। चतुर्विधपुरुषार्थाणां विनाशकरी च त्वमेव। क्षुधा देवी कण्वस्य प्रार्थनामङ्गी चकार। सा वर दानाय समुधताऽस्ति। तत्रैव वरदानं तां याचे -

मयि मद्वंशजे चापि क्षुधे तृष्णे दरिद्रिणि।
याहि पापतरे रुक्षे न भूयास्त्वं कदाचन।।
अनेन स्तवेन ये वै त्वां स्तुवन्ति क्षुधा तुराः।
तेषां दारिद्र्यदुःखानि न भवेयुर्वरोऽपरः।।[11]

अस्मिन्नेवाध्याये गौतमस्यैका कथा पठिता। गोदावर्यां अहल्या संगमस्तीर्थं प्रसिद्धम्। सृष्टिक्रमे काश्चित् शोभना: नार्य: सृष्टाः। तासु कन्या एका सर्वश्रेष्ठा सर्वलक्षणोपेता चासीत्। सा बाला आसीत् तस्मात् पालनाय गौतमाय ददौ। यदा सा युवति भावमापन्ना गौतम: तां वस्त्रादिभिरलंकृत्य ब्रह्मणे समर्पयामास। तस्मिन् समये गौतमस्य मनसि विकार: नासीत्। अहल्यां प्राप्तयौवनां सर्वाभरणभूषिता: दृष्ट्वा इन्द्रादयो देवा: ब्रह्माणं समाजग्मुः। तथा ब्रह्माणं याचुः। ब्रह्मा गौतमस्य गाम्भीरं जीवनं वीक्ष्य चिन्तयामास कन्येयं गौतमाय दातव्या तथापि कदाचित् कलहो न भवेत् तत्कृते एक: मार्ग: कृतः। देवानां मध्ये यः कोऽपि पृथिवीमिमाम् परिक्रम्य सर्वप्रथमं आगमिष्यति। ब्रह्मणो. वच: श्रुत्वा सर्वे धावं धावं परिक्रमणं चक्रुः। तस्मिन् समये कामधेनु: प्रसवायोद्यता बभूव। प्रसवकाले वत्स: अर्द्ध: नि:सृत: आसीत्। तस्यां गवि उभयतोमुखीं गां पृथिवीं वीक्ष्य स गौतम: प्रदक्षिणां चकार सहैव शिवलिंगस्य च परिक्रमणं चकारासौ। ब्रह्मणं संप्राप्य निवेदनं कृतवान्

सम्प्रति पृथिव्या: परिक्रमणं कृत्वा समागतोऽस्मि। ध्यानपूर्वकं दृष्ट्वा ब्रह्मा प्रसन्नो भूत्वा तस्मै ऋषये अहल्यां ददौ। यदा देवा: परिक्रमणं कृत्वा समाजग्मुः। देवा: क्रुद्धा: जाता:। अग्रे इन्द्रस्य कथा सर्वत्र लोके प्रशस्ता एव।

इदानीमपि यदि श्रद्धया गोपालनं भवेत् मनुष्यस्य सर्वं पूरयिष्यति धनुः। अस्माकं समाजे लोकापवादः श्रूयते शूद्रस्य कृते यत् शूद्रः सिद्धि विन्दति। परन्तु पुराणस्यास्याध्ययनेन ज्ञातं मनुष्यमात्रस्य कल्याणं लाक उपदिष्टम्। भगवान् विष्णु: कल्याणानां निधानं इति विशेषणेन परिपुष्टम्। भगवतो विष्णो: स्थानं सर्वेषां कृते कथितम्। उक्तञ्च -

मद्भक्ता: क्षत्रिया वैश्या: स्त्रिय: शूद्रान्त्यजातिजा:

प्राप्नुवन्ति परां सिद्धिं किं पुनस्त्वं द्विजोतम।।

श्वपाकोऽपि च मद्भक्त: सम्यक् श्रद्धा समन्वितः।

प्राप्नोत्यभिमतां सिद्धिमन्येषां तत्र का कथा।।[12]

अस्य पुराणस्य विषय: सामाजिकानां मध्ये कथा प्रसृता। कथायां अक्रूर: नन्दग्रामं प्रति मथुरात: समागतः। अक्रूरस्य मनसि दर्शनस्य भाव: बारम्बारं उत्पद्यते। अद्य मे सफलं जन्म इति मत्वा असौ शीघ्र दर्शनाय प्रस्थित:।

अद्य मे सफलं जन्म सुप्रभाता च मे निशा।

यदुन्निद्राब्जपत्राक्षं विष्णोर्दक्ष्याम्यहं मुखम्।।

पापं हरति यत्पुंसां स्मृतं संकल्पनामयम्।

तत्पुण्डरीकनयनं विष्णोर्द्रक्ष्याम्यहं मुखम्।।[13]

अनेन विज्ञायते अक्रूर: दिव्यज्ञानयुक्त: परमात्मैकनिष्ठ: भक्त आसीत्। कंसभयात् ईश्वरस्य दर्शनं तेन नैव कृतम्। अत: अद्य तावनवसर: लब्धः। अक्रूरः भगवत: कृष्णस्य सौन्दर्यं मनसा चिन्तयामास। अद्य दर्शनं निश्चितमेव भविता। मार्गे सततं तस्य ध्यानं कुर्वन् सद्य एव नन्दग्राममाजगाम। भक्त्या विनम्रहृदय: अक्रूर: अनन्तानन्त ब्रह्माण्ड नायक साग्रजं वत्समध्ये ददर्शी स काल: दुग्धदोहनस्य आसीत्। दुग्धदोहनवेलायां साक्षात् हरि: तत्र उपस्थितो वर्तते। अत्र सावधानैर्भाव्यम् यत् गोपालनं कर्म सेवकानां कर्म नास्ति। इदं प्रशस्तं कर्म स्वहस्तेन पुरुषार्थेन विधेयम्। वत्समध्ये भगवत: अङ्गं नीलकमलाभसमं वभूव। नेत्रे च विकसितकमलपुष्पमिव। वक्षःस्थलं श्रीवत्साकविभूषितमासीत्। यथा चाह -

स ददर्श तदा तत्र कृष्णमादोहने गवाम्।

वत्समध्यगतं फुल्लनीलोत्पलदलच्छविम्।।

प्रफुल्लपद्मपत्राक्षं श्रीवत्साङ्कितवक्षसम्।

प्रलम्बबाहुमायामतुङ्गोर: स्थलमुन्नसम्।।

सविलासस्मिताधारं बिभ्राणं मुखपंकजम्।

तुङ्गरक्तनखं पद्भ्यां धरण्यां सुप्रतिष्ठितम्।।

बिभ्राणं वाससी पीते वन्यपुष्पविभूषितम्।

सान्द्रनीललताहस्तं सिताम्भोजावतंसकम्।।

हंसेन्द्रकुन्दधवलं नीलाम्बरधरं द्विजाः।

तस्यानुबलभद्रं च ददर्श यदुनन्दनम्।।[14]

अष्टादशोत्तरद्विशततमेऽध्याये यमलोकस्य वर्णनक्रमे गवां महत्व निगदितम्। यथा ब्राह्मणा: पूज्या: तथैव गावश्च। मातृपितृणां लोके समादरः श्रूयते तथैव गावश्च समादरणीया:। ये जना: गा: तिरस्कुर्वन्ति तथा दण्डादिभि: ताडयन्ति पादेन स्पृशन्ति ते नरकगामिन:। अन्ये च पापिन: क्रमेणात्र वर्णिताः। अद्य लोकानां मध्ये एषा शिक्षा प्रायेण विलुप्तप्राया तस्मात् ध्यानेन शिक्षणीया:

ये घातयन्ति विप्रान् गा बालं वृद्धं तथाऽऽतुरम्।

शरणागतं विश्वस्तं स्त्रियं मित्रं निरायुधम्।

येऽगम्यागामिनो मूढा: परद्रव्याप हारिण:।

निक्षेपस्यापहर्तारो विष वह्निप्रदाश्च ये।।

परभूमिं गृहं शय्यां वस्त्रालंकार हारिण:।

पररन्ध्रेषु ये क्रूरा ये सदानृतवादिनः।।

ग्रामराष्ट्रपुरस्थाने महादुःखप्रदाहि ये।

कूटसाक्षिप्रदातार: कन्याविक्रयकारका:।।

अभक्ष्यभक्षणारता ये गच्छन्ति सुतां स्नुषाम्।

मातरं पितरं चैव निर्दिष्टा महापातककारिणः।

दक्षिणेन तु ते सर्वे द्वारेण प्रविशन्ति वै।।[15]

षोडशोत्तरद्विशततमेऽध्याये गोदानस्य माहात्म्यं विस्तरेणाभाणि। मांस भक्षणं सर्वेषां कृते निषिद्धम्। यो हि जन: सत्याचरणं कुर्वन् मांसं न संवत स स्वर्गसुखं प्राप्नोति। य: कश्चित् दाता जीवने सहस्रगादानं कृतवान् यश्च जीवन मांसभक्षणं नैव कृतं उभयत्र पुण्यं समं प्रोक्तम्। तद्यथा -

ये च मांसं न खादन्ति सत्यशौचसमन्विताः।

तेऽपि यान्ति सुखेनैव धर्मराजपुरं नराः।।

गो सहस्रं तु यो दद्यात् यस्तु मांसं न भक्षयेत्।

समावेतौ पुरा प्राह ब्रह्मा वेदविदां वरः।।

सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम्।

अमांसभक्षणे विप्रास्तच्च तच्च च तत्समम्।।[16]

वर्णव्यवस्था विषये अस्मिन् पुराणे विस्तृतं वैज्ञानिकं चिन्तनं प्राप्यते। अद्यतनीये समाजे प्रचलित: एक: पन्था: विद्यते वंशे जन्मग्रहणमात्रेण पूतो भवति मानव:। परन्तु अस्य पुराणस्य समग्रं चिन्तनमस्ति वृत्तं यस्य विशुद्धमस्ति स खलु द्विज: ब्राह्मणश्च। ब्राह्मणकुले समुत्पन्न: दुराचारीपुरुष: सर्वत्र पशुभावेन खादति स शुद्रसम: ज्ञेयः। तथा जितेन्द्रिय: शूद्रकूले समुत्पन्न:
शूद्रः शुद्धानुष्ठानेन सद्वृत्तः त्यागेन लोकपकारेण च ब्राह्मणवत् पूज्य एव उक्तञ्च –

ब्राह्मणो वाप्यसद्वृत्त: सर्वसंकरभोजनः।

सब्राह्मण्यं समुत्सृज्य शूद्रो भवति तादृशः।

कर्मभिः शुचिभिर्देवि शुद्धात्मा विजितेन्द्रियः।।

शूद्रोऽपि द्विप्नवत् सेव्य इति ब्रह्मा ब्रवीत् स्वयम्।

स्वभाव कर्मणा चैव यश्चशूद्रोऽधितिष्ठति।।

विशुद्धः स द्विजातिभ्यो विज्ञेय इति मे मतिः।

न योनि पि संस्कारो न श्रुतिर्न च संततिः।।

कारणानि द्विजत्वस्य वृत्तमेव तु कारणम्।

सर्वोऽयं ब्राह्मणो लोके वृत्तेन तु विधीयते।।

वृते स्थितश्च शुद्रोऽपि ब्राह्मणत्वं च गच्छति।।[17]

227 (सप्त्वविंशत्युत्तरद्विशततमे) तमे अध्याये ब्रह्मराक्षसचाण्डालयो: कथा वर्तते। तत्र चाण्डाल तेन राक्षसेण भक्षणार्थ: गृहीत: स चाण्डाल: सत्यशपथं कृत्वा पुनरागमनाय मन्दिरं प्रति गतवान् तत्र रात्रौ एकादश्यां मन्दिरस्य बहिः प्राङ्गणे जागरणं कृत्वा गीत गानं

यशोगानं च कृतवान्। अनन्तरं सत्यवचनानुसारं पुन: ब्रह्मराक्षसं प्रति गन्तुमुद्यत: तावदेव मार्गे एक: जन: तं चाण्डालं प्रबोधयामास। शरीरमाद्यं खलु धर्मसाधनमस्ति। सत्यस्य हरिपालनं कदाचित अनन्तरं कर्तव्यम। इदानीं त्वया शरीरस्य रक्षण विधवा यतोहि ब्रह्मणा उपदिष्टम् -

गोस्त्रीद्विजानां परिरक्षणार्थं विवाहकाले सुरतप्रसंगे।
प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि।।[18]

परन्तु स चाण्डाल: सत्यधर्मा सत्यस्य संरक्षणाय तत्परो भवति। तत्रैव

सत्यस्य माहात्म्यं च तेन भाषितम् -
सत्येनार्क: प्रतपति सत्येनापो रसात्मिका:।
ज्वलत्यग्निश्च सत्येन वाति सत्येन मारुत:।।
धर्मार्थकामसम्प्राप्तिर्मोक्षप्राप्तिश्च दुर्लभा।
सत्येन जायते पुंसां तस्मात् सत्यं न संत्यजेत्।।
सत्यं ब्रह्म परलोके सत्यं यज्ञेषु चोत्तमम्।
सत्यं स्वर्गसमायातं तस्मात् सत्यं न संत्यजेत्।।[19]

अन्ते अस्य पुराणस्य फलश्रुति: श्रुयते। अनेकानि फलानि पुराणस्य श्रवणमात्रेण प्रतिपादितानि तत्र कानिचित् प्रमुखानि फलानि अत्रोदाह्रियन्ते -

इदं हि श्रद्धया नित्यं पुराणं वेदसम्मितम्।
य: पठेत् शृणुयान्मर्त्यः स याति भुवनं हरेः।।
श्रावयेद् ब्राह्मणो यस्तु सदा पर्वसु संयतः।
एकादश्यां द्वादश्यां च विष्णुलोकं स गच्छति।।[20]

अत्र फलं तु विष्णुलोकगमनं ख्यातम्। अन्यच्च फलं तत्रैव श्रूयते। यस्य पुरुषस्य मनसि अन्यत् फलमभीष्टं तत् फलमपि निर्दिष्टम् यथा

यान् यान् कामानभिप्रेत्य पठेत् प्रयतमानसः।
तांस्तान् सर्वानवाप्नोति पुरुषो नात्र संशयः।।[21]

अनेन श्लोकेन सिद्धयति यत् पुराणपठनं न केवलमामुष्मिकफलाय कल्पितम् अपितु संसारस्य ये कामा: श्रूयन्ते तेषाञ्च सिद्धि: अनेन कर्मणा भवति।

सम्पूर्णं पुराणं ध्यानेन सावधानेनालोडितम्। तत्र यत् किञ्चित् प्राप्तं तत् सर्वं प्रवन्धे नियोजितम्।

अस्मिनध्याये गोतत्त्वस्य विषये अनेकानि आख्यानानि सन्ति। निष्कर्ष: अस्ति यत् गो शब्दस्य अनेके अर्था: सन्ति।

सन्दर्भग्रन्थाः -


1. स्कन्दपुराणम् - ब्रह्म धर्मारण्य - 10.18.20
2. अग्निपुराणम् - 292 अध्याये
3. अग्निपुराणम् - तत्रैव
4. ब्रह्मपुराणम् - 1.1-2
5. ब्रह्मपुराणम् - 19.23-26
6. ब्रह्मपुराणम् -49-1-7
7. ब्रह्मपुराणम् - तत्रैव - 1-22
8. ब्रह्मपुराणम् - तत्रैव
9. ब्रह्मपुराणम् - 80-47-52
10. ब्रह्मपुराणम् - 80-54-55
11. ब्रह्मपुराणम् - 85-20-21
12. ब्रह्मापुराणम् - 178-185-185
13. ब्रह्मपुराणम् - 191-2-3
14. ब्रह्मापुराणम् - 191-19-23
15. ब्रह्मपुराणम् - 214-123-128
16. ब्रह्मपुराणम् - 216-63-66
17. ब्रह्मपुराणम् - 223-53-58
18. ब्रह्मपुराणम् - 227-50
19. ब्रह्मपुराणम् - 227-53-55
20. ब्रह्मपुराणम् -245-27-28
21. ब्रह्मपुराणम् - 245-33